# ॥ શ્રીદત્તાત્રેયકવચમ્ ॥

.. shrI Dattatreyakavacham ..

sanskritdocuments.org

August 20, 2017

# .. shrI Dattatreyakavacham ..

# ॥ શ્રીદત્તાત્રેયકવચમ્ ॥

## Sanskrit Document Information

Text title : Dattatreyakavacham

File name : dattAtreyakavacham.itx

Category : kavacha, deities_misc, dattatreya

Location : doc_deities_misc

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Prasad M myshopping.prasad at gmail.com

Proofread by : Prasad M myshopping.prasad at gmail.com, NA

Latest update : August 13, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીદત્તાત્રેયકવચમ્ ॥

શ્રીપાદઃ પાતુ મે પાદાવૂરૂ સિદ્ધાસનસ્થિતઃ ।
પાયાદ્દિગમ્બરો ગુહ્યં નૃહરિઃ પાતુ મે કટિમ્ ॥ ૧॥

નાભિં પાતુ જગત્સ્રષ્ટોદરં પાતુ દલોદરઃ ।
કૃપાલુઃ પાતુ હૃદયં ષડ્ભુજઃ પાતુ મે ભુજૌ ॥ ૨॥

સ્રક્કુણ્ડીશૂલડમરુશઙ્ખચક્રધરઃ કરાન્ ।
પાતુ કણ્ઠં કમ્બુકણ્ઠઃ સુમુખઃ પાતુ મે મુખમ્ ॥ ૩॥

જિહ્વાં મે વેદવાક્પાતુ નેત્રે મે પાતુ દિવ્યદૃક્ ।
નાસિકાં પાતુ ગન્ધાત્મા પાતુ પુણ્યશ્રવાઃ શ્રુતી ॥ ૪॥

લલાટં પાતુ હંસાત્મા શિરઃ પાતુ જટાધરઃ ।
કર્મેન્દ્રિયાણિ પાત્વીશઃ પાતુ જ્ઞાનેન્દ્રિયાણ્યજઃ ॥ ૫॥

સર્વાન્તરોઽન્તઃકરણં પ્રાણાન્મે પાતુ યોગિરાટ્ ।
ઉપરિષ્ટાદધસ્તાચ્ચ પૃષ્ઠતઃ પાર્શ્વતોઽગ્રજઃ ॥ ૬॥

અન્તર્બહિશ્ચ માં નિત્યં નાનારૂપધરોઽવતુ ।
વર્જિતં કવચેનાવ્યાત્સ્થાનં મે દિવ્યદર્શનઃ ॥ ૭॥

રાજતઃ શત્રુતો હિંસ્રાદ્ દુષ્પ્રયોગાદિતોઽઘતઃ ।
આધિવ્યાધિભયાર્તિભ્યો દત્તાત્રેયઃ સદાવતુ ॥ ૮॥

ધનધાન્યગૃહક્ષેત્રસ્ત્રીપુત્રપશુકિઙ્કરાન્ ।
જ્ઞાતીંશ્ચ પાતુ નિત્યં મેઽનસૂયાનન્દવર્ધનઃ ॥ ૯॥

બાલોન્મત્તપિશાચાભો દ્યુનિટ્સન્ધિષુ પાતુ મામ્ ।
ભૂતભૌતિકમૃત્યુભ્યો હરિઃ પાતુ દિગમ્બરઃ ॥ ૧૦॥

ય એતદ્દત્તકવચં સન્નહ્યાદ્ભક્તિભાવિતઃ ।
સર્વાનર્થવિનિર્મુક્તો ગ્રહપીડાવિવર્જિતઃ ॥ ૧૧॥

ભૂતપ્રેતપિશાચાદ્યૈર્દેવૈરપ્યપરાજિતઃ ।
ભુક્ત્વાત્ર દિવ્યભોગાન્સ દેહાન્તે તત્પદં વ્રજેત્ ॥ ૧૨॥

ઇતિ શ્રીમદ્ પરમપૂજનીય શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં

શ્રીદત્તાત્રેયકવચં સમ્પૂર્ણમ્ ।

Encoded and proofread by Prasad M myshopping.prasad at gmail.com

.. shrI Dattatreyakavacham ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*